श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ पञ्चचत्वारिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ पञ्चचत्वारिंशः सर्गः ॥

## बन्धूनां समक्षे सर्वत्र प्रसृतस्य लोकापवादस्य वर्णनं कृत्वा श्रीरामेण सीतां वने विसर्जयितुं लक्ष्मणं प्रत्यादेशः

तेषां समुपविष्टानां सर्वेषां दीनचेतसाम्।
उवाच वाक्यं काकुत्स्थो मुखेन परिशुष्यता॥ **7.45.1** ॥

सर्वे शृणुत भद्रं वो मा कुरुध्वं मनोऽन्यथा।
पौराणां मम सीतायां यादृशी वर्तते कथा॥ **7.45.2** ॥

पौरापवादः सुमहांस्तथा जनपदस्य च।
वर्तते मयि बीभत्सा सा मे मर्माणि कृन्तति॥ **7.45.3** ॥

अहं किल कुले जात इक्ष्वाकूणां महात्मनाम्।
सीतापि सत्कुले जाता जनकानां महात्मनाम्॥ **7.45.4** ॥

जानासि त्वं यथा सौम्य दण्डके विजने वने।
रावणेन हृता सीता स च विध्वंसितो मया॥ **7.45.5** ॥

तत्र मे बुद्धिरुत्पन्ना जनकस्य सुतां प्रति।
अत्रोषितामिमां सीतामानयेयं कथं पुरीम्॥ **7.45.6** ॥

प्रत्ययार्थं ततः सीता विवेश ज्वलनं तदा।
प्रत्यक्षं तव सौमित्रे देवानां हव्यवाहनः॥ **7.45.7** ॥

अपापां मैथिलीमाह वायुश्चाकाशगोचरः।
चन्द्रादित्यौ च शंसेते सुराणां सन्निधौ पुरा॥ **7.45.8** ॥

ऋषीणां चैव सर्वेषामपापां जनकात्मजाम्।
एवं शुद्धसमाचारा देवगन्धर्वसन्निधौ॥ **7.45.9** ॥

लङ्काद्वीपे महेन्द्रेण मम हस्ते निवेशिता।
अन्तरात्मा च मे वेत्ति सीतां शुद्धां यशस्विनीम्॥ **7.45.10** ॥

ततो गृहीत्वा वैदेहीमयोध्यामहमागतः।
अयं तु मे महान् वादः शोकश्च हृदि वर्तते॥ **7.45.11** ॥

पौरापवादः सुमहांस्तथा जनपदस्य च।
अकीर्तिर्यस्य गीयेत लोके भूतस्य कस्यचित्॥ **7.45.12** ॥

पतत्येवाधमान् लोकान् यावच्छब्दः प्रकीर्त्यते।
अकीर्तिर्निन्द्यते देवैः कीर्तिर्लोकेषु पूज्यते॥ **7.45.13** ॥

कीर्त्यर्थं तु समारम्भः सर्वेषां सुमहात्मनाम्।
अप्यहं जीवितं जह्यां युष्मान् वा पुरुषर्षभाः॥ **7.45.14** ॥

अपवादभयाद् भीतः किं पुनर्जनकात्मजाम्।
तस्माद् भवन्तः पश्यन्तु पतितं शोकसागरे॥ **7.45.15** ॥

नहि पश्याम्यहं भूतं किञ्चिद् दुःखमतोऽधिकम्।
श्वस्त्वं प्रभाते सौमित्रे सुमन्त्राधिष्ठितं रथम्॥ **7.45.16** ॥

आरुह्य सीतामारोप्य विषयान्ते समुत्सृज।
गङ्गायास्तु परे पारे वाल्मीकेस्तु महात्मनः॥ **7.45.17** ॥

आश्रमो दिव्यसङ्काशस्तमसातीरमाश्रितः।
तत्रैतां विजने देशे विसृज्य रघुनन्दन॥ **7.45.18** ॥

शीघ्रमागच्छ सौमित्रे कुरुष्व वचनं मम।
न चास्मि प्रतिवक्तव्यः सीतां प्रति कथञ्चन॥ **7.45.19** ॥

तस्मात् त्वं गच्छ सौमित्रे नात्र कार्या विचारणा।
अप्रीतिर्हि परा मह्यं त्वयैतत् प्रतिवारिते॥ **7.45.20** ॥

शापिता हि मया यूयं पादाभ्यां जीवितेन च।
ये मां वाक्यान्तरे ब्रूयुरनुनेतुं कथञ्चन॥ **7.45.21** ॥

अहिता नाम ते नित्यं मदभीष्टविघातनात्।
मानयन्तु भवन्तो मां यदि मच्छासने स्थिताः॥ **7.45.22** ॥

इतोऽद्य नीयतां सीता कुरुष्व वचनं मम।
पूर्वमुक्तोऽहमनया गङ्गातीरेऽहमाश्रमान्॥ **7.45.23** ॥

पश्येयमिति तस्याश्च कामः संवर्त्यतामयम्।
एवमुक्त्वा तु काकुत्स्थो बाष्पेण पिहितेक्षणः॥ **7.45.24** ॥

संविवेश स धर्मात्मा भ्रातृभिः परिवारितः।
शोकसंविग्नहृदयो निशश्वास यथा द्विपः॥ **7.45.25** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे पञ्चचत्वारिंशः सर्गः॥